# 21- एकविंश दशकम्

## नव वर्षाणि, सप्त द्वीपादयः च

मध्योद्भवे भुव इलावृत नाम्नि वर्षे
गौरी प्रधान वनिता जनमात्र भाजि ।
शर्वेण मन्त्र नुतिभिस् समुपास्य मानं
सङ्कर्षणात्मक मधीश्वर संश्रये त्वाम् ॥ ॥21-1॥

भद्राश्व नामक इलावृत पूर्व वर्षे
भद्रश्रवोभिर् ऋषिभिः परिणूयमानम् ।
कल्पान्त गूढ निगमोद्धरण प्रवीणं
ध्यायामि देव हयशीर्ष तनुं भवन्तम् ॥ ॥21-2॥

ध्यायामि दक्षिण गते हरिवर्ष वर्षे
प्रह्लाद मुख्य पुरुषैः परिषेव्यमाणम् ।
उत्तुङ्ग शान्त धवला कृति मेकशुद्ध
ज्ञान प्रदं नरहरिं भगवन् भवन्तम् ॥ ॥21-3॥

वर्षे प्रतीचि ललितात्मनि केतुमाले
लीला विशेष ललित स्मित शोभनाङ्गम् ।
लक्ष्म्या प्रजापति सुतैश्च निषेव्यमाणं
तस्याः प्रियाय धृतकाम तनुं भजे त्वाम् ॥ ॥21-4॥

रम्ये ह्युदीचि खलु रम्यक नाम्नि वर्षे
तद् वर्ष नाथ मनुवर्य सपर्यमाणम् ।
भक्तैक वत्सल ममत्सर हृत्सु भान्तं
मत्स्याकृतिं भुवन नाथ भजे भवन्तम् ॥ ॥21-5॥

वर्षं हिरण्मय समाह्वय मौत्तराहम्
आसीन मद्रि धृति कर्मठ कामठाङ्गम् ।
संसेवते पितृगण प्रवरोऽर्यमा यं
तं त्वां भजामि भगवन् परचिन्मयात्मन् ॥ ॥21-6॥

किञ्चोत्तरेषु कुरुषु प्रियया धरण्या
संसेवितो महित मन्त्र नुति प्रभेदैः ।
दंष्ट्राग्र घृष्ट घन पृष्ठ गरिष्ठ वर्ष्मा
त्वं पाहि बिज्ञनुत यज्ञ वराह मूर्ते ॥ ॥21-7॥

याम्यां दिशं भजति किंपुरुषाख्य वर्षे
संसेवितो हनुमता दृढ भक्ति भाजा ।
सीताभिराम परमाद्भुत रूपशाली
रामात्मकः परिलसन् परिपाहि विष्णो ॥ ॥21-8॥

श्रीनारदेन सह भारत खण्ड मुख्यैः
त्वं साङ्ख्य योग नुतिभिस् समुपास्यमानः ।
आकल्प काल मिह साधु जनाभिरक्षी
नारायणो नरसखः परिपाहि भूमन् ॥ ॥21-9॥

प्लाक्षेऽर्क रूप मयि शाल्मल इन्दुरूपं
द्वीपे भजन्ति कुश नामनि वह्नि रूपम् ।
क्रौञ्चेऽम्बु रूप मथ वायु मयञ्च शाके
त्वां ब्रह्मरूप मपि पुष्कर नाम्नि लोकाः ॥ ॥21-10॥

सर्वैर् ध्रुवादिभि रुडु प्रकरैर् ग्रहैश्च
पुच्छादि केष्व वयवेष् वभि कल्प्यमानैः ।

त्वं शिंशुमार वपुषा महता मुपास्य:
सन्ध्यासु रुन्धि नरकं मम सिन्धु शायिन् ॥ ॥21-11॥

पाताल मूल भुवि शेष तनुं भवन्तं
लोलैक कुण्डल विराजि सहस्र शीर्षम् ।
नीलाम्बरं धृत हलं भुजगाङ्ग नाभि:
जुष्टं भजे हर गदान् गुरुगेहनाथ ॥ ॥21-12॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥